या विभक्ता २२ नभः समीद्यापुप्यैर्विमलं विशुकवर्हाभरणैवनेषु त्रि
यासुरक्तानि निरुत्सशोभा भागतान्स्वाध्यनपयामयूराः २३ ॥
तेषु १९ पक्वमन्तु सरतिप्रक्लीनः विनीष्यन्जलं संशोषयन् शरत्कालइतिशेषः मत्तद्विपानां दर्पमधिकं
कुर्वन्विभाति २० मानसमरस्तः सेन सहाभ्यागतैस्त्वकवाकैः सहक्रीडन्ति २१ २२ विमुक्तपक्षैकवद्रूपमा

६२

कोटिघटितसंख्येयान्यर्बुदस्याग्रे पदिपासंख्यासमुद्राख्यातयासंख्य
पागतिता २

76A

नति
मतस्रोतेनोविलंब
तेनत्यक्तस्यापिकेस्या
विवलितेनेद्वलस्य
वाधवत्तास्यातालं
इत्यत्रानिजीवने
नाहि २८

भवमित्तिरेण्यतियोषः २५ प्रतिकृतः कृतोपकारस्यापि यो भाकपिराज २६ तवात्तयास्मेकेमध्येकस्यचिद
पीतिसंवयः २७ हेयानवयुग्मप्रष्याः कानयशो [illegible] कोपिकाहरयः तेसंतितेषामध्येकः तेकृतेत्वदर्थे
किंकरानितियोषः कुत्रचित कुत्रचेन्नेत्तथाज्ञापयेतियोजना २८ मतितदवस्थानविषया २९ ३० सेनाग्र
देवदानवगंधर्वाः प्रस्तरांसमरुद्गणाः नचपत्राभयंतस्यकुर्युः किमिवरादमाः ३१ तदेवंशाखिमृगेन्द्रस्य
एवंप्रलिकृतस्तया रामस्याहंसिपिंगाक्षाकेनसर्वात्मनाप्रियं ३२ नाथस्त्वादवनेनाप्यगतिनोपविवादवे
कस्यचित्सुज्ञातेस्मांकेकपीश्वरतवात्तया ३३ तथात्तापयनः किंतेकृतेवसतेकुत्रचित दरयोलप्र
वृष्यास्तेसतिकोप्युग्रशोनेय ३४ तस्यतद्वचनंश्रुत्वाकालेसाधुनिरूपितं सुग्रीवः सत्वसंपन्नश्च
कारमतिमुत्तमां ३५ संदिदेशातिमतिमानुनीलंनित्यकृतोयमं दिक्षुसर्वासुसर्वेषांसैन्यानामुप
संग्रहे ३६ यथासेनासमग्रामेक्षय्यपालाश्चसर्वशः समागच्छेत्यसंगेनसेनाग्रणीस्तथाकुरु ३७
येत्वंतपालाः प्लवगाः शीघ्रगाव्यवसायिनः समानयंतुतेशीघ्रंत्वरिताः शासनान्मम ३८ स्वयंचानं
तरंकार्यंभवानेवानुपश्यतु ३९ ॥
एणीसेनाग्रेसरानतयाकृतनयात्तापपथमसंगेनप्रविलंबेन ३८ अंतपालाः दिगंतवर्तिसेनापतयः समानयतस
मागच्छंतु ३९ यनंतरकालपनानंतरकार्यंसेनादर्शनगणन्यादिस्वनुपश्यतुसंपादयतु ३३

रा. वा. कि. टी. ३५ त्रिपंचरात्रात्पंचदशाहदिनात अर्वाक् यः प्रागेवैतस्य दंडः तेन पक्षमध्ये सर्वैरागंतव्यमिति भावः ३४ वृद्धानद्री
स्तागेदाभवाउपयातसमानननार्थमितिशेषः ३५ इत्येकोनत्रिंशः सर्गः २९ कालेसेनायोगाकालमसमारब्धम्

त्रिपंचरात्रादूर्ध्वं यः प्राप्नुयादिह वानरः तस्य प्राणांतिको दंडो नात्र कार्या विचारणा ३५ हरींश्च वृद्धा
नुपयातु सांगदो भवान्ममाज्ञामधिकृत्य निश्चिताम् ३५ इत्यार्षे किष्किंधाकांडे एकोनत्रिंशः सर्गः २९
गुहां प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः वर्षरात्रोषितो रामः कामशोकाभिपीडितः १ पांडुरं गगनं दृ
ष्ट्वा विमलं चंद्रमंडलं शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् २ कामवृत्तं च सुग्रीवं नष्टां च जनकात्म
जां दृष्ट्वा कालमतीतं च मुमोह परमातुरः ३ स तु संज्ञामुपागम्य मुहूर्तान्मतिमान्नृपः मनःस्थामपि वै
देहीं चिंतयामास राघवः ४ दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकं सारसारवसंघुष्टं विललापा
जलेंद्रियः ५ आसीनः पर्वतस्याग्रे हेमधातुविभूषिते शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ६ ॥

लविनोवभूव ३ संज्ञां वितस्वास्थ्यं मनःस्थां मानसः संनिहितां मयि चिंतयामास जीवति न वा कथमेनां प्रत्या
नेष्यामीति चिंतनं चकार ४ सारसानां शब्दैः संघुष्टं शब्दवद्व्योम रहितमिति संबंधः ५ हेमवर्णधातुभिर्विभूषिते ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

761A

मारिसा स्वससन्नादैः सारसारवोस्थितिभिः यामे बाला प्रश्रमे रमते साग्रजनरजोवशोयाभामाकथं रमते

॰ कोवतानि वकाचनशुभ्यानिवनिर्मिलानमिन इह वासोद्यातिशयात्मनः पुनस्तान्यपश्यतीतदा च मामपश्य

वीकथं वर्तते ८ केतेन शोकेन तुष्यतेरत्यन्वयः कलभाषिणीकोमलशाह्वरी ९ निशाम्य श्रुत्वा कथं भवि

ना १ सारसारवसंनादैः सारसारवनादिनी याश्रमे रमते बाला सा य मे रमते कथं ७ पुष्पितानां वसनानां दृष्ट्वा

कांचनानि वनिर्मलान् कथं सा रमते बाला पश्यती माम पश्यती ८ या पुरा कलहंसानां स्वरेण

कलभाषिणी बुध्यते चारुसर्वांगी सा य मे बुध्यते कथं ९ निस्वनं चक्रवाकानां निशाम्य सहचारि

णां पुंडरीकविशालाक्षी कथमेषा भविष्यति १० सरांसि सरितो वापीः काननानि वनानि च तां वि

ना मृगशावाक्षीं विनाय सा सुखं लभे ११ अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनी सुदूरं पीडयेत्का

६२ मः शरद्गुणनिरंतरः १२ एवमादि नरश्रेष्ठो विललाप नृपात्मजः विहंग इव सारंगः सलिलं त्रिदशेश्व

रात् १३ अतः संचार्य जटिल फलार्थी गिरिसानुषु ददर्श पर्युपावृत्तो लक्ष्मीवाल्लक्ष्मणाग्रज १४

अतः सं चा बातिकथं सम्धारयिष्यतीत्यर्थः कामनानिलता इत्यग्गुल्मपदेशात् १५ शरद्गुणैर्निरंतरः प्रवृद्धः कामः सो

ततस्तं चूर्णं रम्ये ऽकमार्यो समद्वियोगात् द्वियागाच्च देता स्वाभामिनी हरमतिशायेन न पीडयेदपि तु पीडयेदेव १६ सारंगा रवका

षु फलार्थी ततस्तु तत्कालेरम्येषु गिरिसानुषु वंदूर्यास्तु दुःखेन मार्हे तकोविहगमस्तुविनोपथ्याविदिशोप्यरा तलेका तमारोणविलपतिस्म एवं सीता प्राप्तिकां दमार्गेण विलाप

तं च रित्वा पड्लुंगता दार्घोऽ समासे ल्यप् पृ पर्युपावृत्तो ल ६२
दमनोः मजंरामदंदर्श १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कामवशत्वं त्यक्त्वा कर्मयोगं कुरु किं च प्रमादिकर्मयोगेन तत्कालमवसरप्राप्तं यं समाधिं हित्वा नु संवानं हि पा
हरतीति हिः योऽकृत्स्नेन किमर्थं संक्रियते अत्राप्यवस्था पापयोगे न समाधिनाश वृद्धिः स्यादिति शेषः किं न निवर्तितेन सर्वः
एवमेव [illegible] इति कतक कृतः पाठान्तरं स्यात् [illegible] इति च सः

क्रियालंकृतोऽयं यत्नात् दीनामभितः कालस्य न योगमनुष्ठाने ४

रा॰ कि॰ टी॰ ७७

77

विषादद्विषादवर्षमात ॥ हे आर्य यदा यत्काले समाधिः किं न समाधानं संपादनीयं अस्मिन्काले
अयं समाधिः क्रियते किमर्थं संक्रियते कामस्य वशगतेन वशगमनेन किं ते [illegible] यात्रस्य आर्षः अपि च
वमा [illegible] पौरुषपराभवे न किं पौरुषमेव पोढव्यं नार्थं पाद. किं न निवर्तितेन योगेन किं किं प्रयोजनं सा
धितस्याधितस्यान्नु किमपीत्यर्थः ॥ हे अदीन सततं क्रियाभियोगे [illegible] मनसः प्रसादसमाधियोगा
ते वितथाः सद्यापरीते विसंततमेकं विजने मनस्वी आतं विषादाद्विरतिं निदीनः समीक्ष्य सामि चिर
वाक्तदीने ॥ किमर्थं कामस्य वशं गतेन किमात्मपौरुषपराभवेन अयं यया संक्रियते समाधिः किं
मत्रयोगेन निवर्तितेन ॥ क्रियाभियोगमनसः प्रसादं समाधियोगानुगतं च काले संदेयसामर्थ्यम
हीनसत्वस्व कर्महेतु वक्षः रूपेयाग ॥ न ज्ञानकीमानवं वशगायत्नया संतापात् स्थलभापौरेण न वा
शिचूडामणिलितामपेत्य नद्यातेवीरं वदाहं कश्चित ॥ सलक्ष्मणलक्ष्मणमप्रभुः स्वभावजं वाक्यमु
क्तवन्तं वीरं पापामा बावराम हितं वपथ्यावनप्रमतं समामर्थ्य समाहितं च ॥ मनुवंहं कालं वस
५५ हायसामर्थ्यं सुग्रीवादिसहायसामर्थ्यं स कर्मयोगं देवतोपासनायोगं तु हे त्वं कुरु क्रियायोगादिकं स
वेदाकार्यसिद्धेहेतुं कुरु स्वयं ॥ ज्वलितमग्निचूडामणिशिखा अपेत्य स्वयुक्ताकः स्थितः पिनद्धलवे धृतेन
अर्पितवह्निरत्यार्तिरितः सर्वोऽपि दह्यते एव ॥ रामः अथ पथ्ययुक्तिभिरविवालोक्य स्वभावजन्यस्वभावजस्व
भावमिव वाक्यमुक्तवते लक्ष्मणसहिते लक्ष्मणं अवाच हे लक्ष्मण यत्त्वया अग्रे उक्तं वाक्यं तद्धितमेव नत्का

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

77A

प्रियकेरसनहूवैः २४ कुसुमोद्गतानांमसकृदकुलसमः प्रानष्वहूनानां मदोत्कटाग्रपिकमदायुतपवः
मदलालसाः मदशाहेनतनवः कामभोगास्त्वेकावतः २५ शास्त्रवृतेतितासिवहियोना विमलावणामल्प
पयस्यतत् कालुदाभाश्चतेशीताश्चेत्तयथैः २६ सूर्यातपमकामणसंवयः चिरेणदृष्यादिनतःसाद्रारेणुर्यया

विपाणां प्रकाशितः

मनोत्तरगंधैः प्रियकेरनलैः गुच्छाग्रभारावनताग्रशाखैः स्वर्णगौरैर्नयनाभिरामैर्कृत्यातितानीववनां
तराणि २७ प्रियान्वितानांनलिनीश्रियाणां वनश्रियाणां कुसुमोद्गतानां मदोत्कटानां मदलालसानां
नोतमानानभातयोग्नमदाः व्यभ्रनभःशास्त्रविधोतवर्णाः कृशप्रवाहाणि नदीजलानि कालुदाश्चशीताःपवनाः
प्रवांतितमोविमुक्ताश्चदिशःप्रकाशाः २८ सूर्यातपक्रमणनष्टपंकाभूमिश्चिरोद्घाटितसांद्ररेणुः
पुनैरयोन्यवैरेणसमागतानांमुद्योगकालोयनराधिपानां ३० शारत्गुणप्यायितरूपशोभाः प्रहर्षिताः
पांसुसमुत्थिताग्राः ३१ मदोत्कटाः संप्रतियुद्धलुब्धावृषाभवामध्यगतानदंति ३२ समन्मथास्तीव्रत
रागरागाः कलान्वितामदगानिकरिण्यः मदान्वितस्संप्रतिवार्यमानवनेषुमत्ताःसमदंप्रयांति ३३ न
ग१ क्वाववाणात्पविभूषितानिवरोद्वाणिततोरापतानदीनां निभंद्यमानाश्चवसारसौघैः प्रयांतिदीनाविमना
शारदत्परार्थकालोयं ३४ आप्यायितेवर्पितेरूपशोभेयेषांपांसुसमुत्थिताग्राः पांसुशुक्लाग्राः ३५ समा
समथवार्दिविशेषणानयकरिण्याः मदयातिमितिमलः ३६ विभूषितेविभूषणसारसौघैः हंससमूहैः विम
नाःमवाःमनःपयीयामनप्रोक्ताकारांतापिहिरुकोशात ५० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चंचत्तांशुप्रभमानानां चंद्रकिरणानां स्पर्शेन योहर्षस्तेनोन्मीलिता ईषत्प्रकाशिता तारा कानदृचालिनेत्रकानीनिका वयस्या सा रागवती रक्तवर्णा
अनुरक्ता च अत्र वरमाकांक्षं वत्स्यं वसमासोक्तिरलंकारः कांतकरस्पर्शसुखोद्धर्षोन्मीलितनयना या त्वदनुरागवती स्त्री तद्वत् राजिर्तविगलितवसना सा:

कामुकस्याप्तं तां
स्पर्शसुखायाभो
तादितिबी टी.
धामपृ५४बी. कि.
टीका टी.
५४
78

चंचद्ध्वंद्वकरस्प
र्शहर्षोन्मीलित
तारिका कम्रा
रागवती सन्ध्या
भाति स्वयमं
वरा इव पम्वलम

महार्णवैर्विततास्येति संबंधः भिन्नकटाः मदेनेति शेषः बुद्धांबुजानि विकसितकमलानि ५१ ससारसा च्युतास्तदा
रावविनादिता अभूताः ५२ प्रतिप्रहृष्टानिलो महावायुः बर्हिणोमयूराः प्लवंगमा भेकाः ५३ अनेकवर्णोयं घोते
तेनवादिते षट्पदेषु स्वविनष्टकायाः सत्त्वानष्टदेहास्तत्राः अतपवनष्टम्मृतप्रायाः ५४ शशांकोदितसौम्यव-

विप्रास्यकारंडवचक्रवाकान्महार्णवैर्भिन्नकटागजेन्द्राः सरःसबुद्धांबुजभूषणेषुकैरविविलोक्यमलेपि
वंति ५१ व्यपेतपंका ससवालुका सप्रसन्नतोयास सगोकुलास ससारसा रावनिनादितास नदीषु हंसा
निपतंति हृष्टाः नदीघनप्रस्रवणोदकानामतिप्रहृष्टानिलबर्हिणानां प्लवंगमानां च गतोत्सवानाम्
वेखाः संप्रतिसंप्रनष्टाः ५२ अनेकवर्णाः स्वविनष्टकाया नवोदितेषु षट्पदेषु नष्टाः ह्यधार्दितानी रवि
षाविलम्बचिरोषिता पि प्रसरंति सर्पाः ५४ रात्रिः शशांकोदितसौम्यवक्त्रा तारागणोन्मीलितचारु
नेत्रा ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृतांगी विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता
सारसचारुपंक्तिः नभः समाक्रामति शीघ्रवेगा वातेन वधूतेव यथितेव माला ५८ सुप्तैकहंसं कुमुदैरुपे
तं महाह्रदस्थं सलिलं विभाति घनैर्विमुक्तं निशि पूर्णचंद्रं तारागणाकीर्णमिवांतरिक्षं ५७

शशांक उदितशशांक एव सौम्यवक्त्रं यस्याः सा तारागणाः एवोन्मीलितानि चारूणि नेत्राणि यस्याः सा ५५ शालिप्र-
सवानि व्रीहयः मालेव नभः समाक्रामति ५८ सुप्तैकहंसमिति चंद्रप्रतिबिंबवत् महाह्रदस्थमिति गंभीरत्वेन
तेन मंत्रणीत शायेनाकाशसाम्याय चैनेविसमक्रमितिय दिशणीवायासं ५७ ॥

५८

78A

प्रकीर्णा हंसा इव कूलामेखलाया यासां वा प्लुतमानां उत्तमवापीनां ४८ वेणुस्वनरूपेणाव्याजितेनव्यक्तेन तूर्येण

गम्भावयेद्यो घोषाणामिश्रः प्रत्यूषकाले प्रातः काले अनिलेन संप्रवृत्तः तत्संबन्धेन जातः संमूर्छितो व्याप्तः गर्गरगाढ

घोषाणां गर्गराणां दधिमन्थन भांडानां गोदुहां च शब्दः अन्योन्यमाह्वयतीव प्रत्यूषकाले भवद्दोगोघोषाः गोष्ठे

पुर्वोक्तवायानि वादयति गोप्यो गर्गरास्थमंथनिःस्वनं दधिमन्थनसमुदितशब्दः प्रवृत्त इत्यर्थः ४९ नदीनां

प्रकीर्णहंसा कूलमेखलानां प्रबुद्धपद्मोत्पलमालिनीनां वा प्लुतमानामपि कांचलक्ष्मीर्वरांगनाना

मिव भूषितानां ४८ वेणुस्वनव्याजितत्तूर्यमिश्रः प्रत्यूषकालेनिलसंप्रवृद्धः संमूर्छितो गर्गरगाढ

घोषाणामन्योन्य[illegible]माह्वयतीव शब्दः ४९ नवैर्नदीनां कुसुमप्रभासैर्व्याधूयमानैर्मृदुमारुतेन यैतामल

लतामपदप्रकाशैः कूलानि पुष्पैरुपशोभितानि ५० वनप्रदेशा मधुपानशौंडाः प्रियाविताः षट्पदवृ

न्दाप्रहृष्टाः वनेषु मत्तापवना [illegible] वेति पश्वामनरेण गौराः जलप्रसन्नं कुसुमप्रहासं क्रौंच

स्वनं शालिवनं विपक्वं मृदुश्च वायुर्विमलश्च चन्द्रः शंसंति वर्षव्यपनीतकाल ५२

कूलानि मृदुमारुतेन व्याधूयमानैः कंपितैः कुसुमप्रभासैः कुसुमविशेषैर्युतैः यैतामलयदसदृशैः काशैरुप

शोभितानि ५० वनेषु प्रदेशाः निरंकुशा गतपुः मधुपानेन शौंडाः मत्ताः पद्मानामसवाना हरेणाभिगीताः पीताः

षट्पदवृन्दानि [illegible] वनेषु पवना [illegible] वेति गेयं लाभादिति भावः ५१ कुसुमप्रहासः प्रलोभायस्मिन् तत्तथा

शालिवनं वर्षव्यपनीतव्यपनयो यस्मिन् तं कालं शरत्कालमिति यावत् ५२ ॥

शालि समूह [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रा॰ वा॰ कि॰ टी॰ ३१ 79

मेनापवोपसंदर्शनामेखलायास्तां ५३ चक्रवाकशैवलकाशारोचनापङ्क्तेरवाक्दनउत्कूलस्यानीयाः ५४
उक्तविशेषणविहेषुवनेषु प्रपवउपापः कामः गृहीतचापनउयतः प्रयुक्तस्वरदंडः तौरूपादंउनेयेनतथाव
तेते ५५ ५८ शरत्प्रंदकराणांकिरणानांस्पर्शेनयाहर्षेणनोन्मीलिताईषत्प्रकाशितास्तारकाभ्यलोचनानिनेत्र

मीनोपसंदर्शितमेखलानां नदीवधूनां गतयो यमंदाः ॥ कांतापभुक्तालसगामिनीनां प्रभातकालेष्विव
कामिनीनां ॥ सचक्रवाकानि ससैवलानि काशैरुकूलैरिव संहतानि ॥ सपत्रलेखानि सरोचनानि वधू
मुखानीव नदीमुखानि ॥ ५४ प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकूजितेषु ॥ गृहीतचापायतचड २३
दंडः प्रवेरचायोयवनेषु कामः ५५ लोकंसहृद्यापयिताषयित्वा नदीसटाकानि च शरयित्वा ॥ निष्पन्नस
स्यावसुधां वहन्त्वात्यक्तानभस्तोयधराः प्रनष्टाः ५६ ॥ दर्शयंति शरन्नद्यः पुलिनानि शनैः शनैः ॥ नवसंग
मसव्रीडा जघनानीव योषितः ५७ प्रसन्नसलिलाःसौम्यकुररीभिर्विनादिता ॥ चक्रवाकगणाकीर्णा वि
भांति सलिलाशयाः ५८ शारच्चंद्रकरस्पर्शहर्षोन्मीलिततारकाः ॥ अहोरागवती संध्या जहाति स्वयमंब
रं ५९ ग्रहेभ्यः स्वबद्धवैराणांजिगीषूणां नृपात्मज उद्योगसमयः सौम्य पार्थिवानामुपस्थितः ६०

कनीनिकाव्ययपायत्रागवतीचक्रवर्णाग्रभ्रुरकावभूवरमाकाशंवस्त्रंवत्समासोक्तिरलंकारः कांतकरस्पर्शस्तु ॥ ५ ॥
खादर्धोन्मीलितत्त्ववनापासत्त्वरागवशान्स्वतोविगलितवसनायाः कामुक्याहृतानस्पर्शसंध्यायामारोपात ५९ ७८

79A

याक्वाउवस्थितेतिशेषः पश्याविविधपाञ्चोपयेगिनमुद्योगं वनस्यनपश्यामीत्यनुकर्षः ८१ चत्वारइतियद्यपि॰
वक्तेर्याभासोविधतपवतथापितत्रायोगाभावेनतस्यापिगात प्रापत्नाद्दतास्वगुक्तिः ८२ वक्रवाकोभर्तारमि
वविषमदंडकारण्यमुद्यानमिवपामाह इतोमेमासावर्षशतोपमागताइतिपूर्वेणान्वयः ८३ ८४ कृपायाम
करेणेद्दत्नेभृत्वपतिष्ठनाथइति ८५ सुग्रीवस्यसुग्रीवेणशेषशेषश्री ८६ परिसंख्यापयाणधियत्वानयघ्नतेम

इंसत्वाप्रथमायात्रापार्थिवानांनृपात्मज नचपश्यामिसुग्रीवमुद्योगंवातथाविधं ८१ चत्वारोवार्षि
कामासागतावर्षशतोपमाः ममशोकाभितप्तस्यसौम्यसीतामपश्यतः ८२ चक्रवाकीवभर्तारंपृष्ठतोऽ
गतावनं विषमंदंडकारण्यमुद्यानमिववांगना ८३ प्रियाविहीनेदुःखार्तेहृतराज्येविवासिते कृपांन
कुरुतेराजासुग्रीवोमयिलक्ष्मण ८४ [illegible] दीनोहमल्पहः कामी:
मावैवशरणंगतः ८५ इत्येतैःकारणैःसौम्यसुग्रीवस्यदुरात्मनः अहंवानरराजस्यपरिभूतःपरंतप
८६ [illegible] सकालंपरिसंख्यायसीतायाःपरिमार्गणे कृतार्थःस
मयंकृत्वादुर्मतिर्नावबुध्यते ८७ सकिष्किंधांप्रविश्यत्वंब्रूहिवानरपुंगवं मूर्खंग्राम्यसुखेसक्तंसुग्री
वंवचनान्मम ८८ अर्थिनामुपपन्नानांपूर्वंचाप्युपकारिणां आशांसंश्रुत्ययोहंतिसलोकेपुरुषाधमः ८९

ग्रा पु

मयमितिशेषः ८७ ८८ उपपन्नानांबलवीर्यादियुक्तानां शुभंवायदिवापापंयोहिवाक्यमुदीरितं सत्येन
ग्रांशात्प्रतिमन्तार्थविपर्यासकृत्यप्रतिनिताय ८९ योहिउदीरितंवाक्यंसत्येनप्रेमाचनयापरिगृह्णाति

असनाःसमव
र्णाभ्रकोविदा
रास्त्रपुष्पिताः
दृश्यंतेवंधुजीवा
श्चश्यामाश्चगि
रिसानुषुपश्य
ससारसवेकोके
:कुरुरैश्चसमंत
तःपुलिनान्यव
कीर्णानिनदी
नांपश्यलक्ष्मण
५२ ॥ म: १

किष्का टी ७ ॥

रा॰
वा॰कि॰
टी॰

न भवंतीति कार्यायेति शेषः क्रव्यादाः श्वादयः २२ संश्रोतुमिच्छतीत्युत्तरं इति सुग्रीवं ब्रूहीति संबंधः २३ वीर-
नृपात्मज लक्ष्मण त्वत्सहायस्य मे पक्वाते सालगिरिभूविदलनादिशूरस्य मम प्रतिहते पराक्रमैकामं परिज्ञाते सत्यपि सु-
स्य सुग्रीवस्य चिंता वालिवन्मामपि दूनिष्यतीति विचारः कामं तस्या न भवेदेतच्छाश्वतमित्यर्थः २४ प्रथमा

कृतार्था ह्यकृतार्थानां मित्राणां न भवंति ये तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुंजते २१ नूनं कांच-
नपृष्ठस्य विकृष्टस्य मया रणे द्रष्टुमिच्छति चापस्य रूपं विद्युद्गणोपमं २२ घोरं ज्यातलनिर्घोषं क्रुद्ध-
स्य मम संयुगे निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छति २३ काममेवंगतेप्यस्य परिज्ञाते पराक्रमे
त्वत्सहायस्य मे वीर न चिंता स्यान्नृपात्मज २४ यदर्थमयमारंभः कृतः परपुरंजय समयं नाभि-
जानाति कृतार्थः प्लवगेश्वरः २५ वर्षासमयकालं तु प्रतिज्ञाय हरीश्वरः व्यतीतांश्चतुरो मासान्विह-
रन्नावबुध्यते २६ सामात्यपरिषत्क्रीडन्पानमेवोपसेवते शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयां
२७ उच्यतां गच्छ सुग्रीवस्त्वया वीर महाबल मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः २८ ॥

रंभः सख्यकरणवालिनिरसनरूपायदर्थं यस्मै सीतान्वेषणप्रयोजनाय कृतः समयं तद्विषयसंकेतं प्लव-
गेश्वरो नाभिजानातीति संबंधः २५ वर्षांतरकालमेव सममयकालं प्रतिज्ञायेत्यर्थः २६ पानं प्रपानं २७
मम रोषस्य यद्रूपं तत्सुग्रीवस्योच्यतां इदं वक्ष्यमाणवचनं च ब्रूयाः इति संबंधः २८

३२

80A

नहत्वग्राहेनेतिहतोवालीयेययथागतः सयथाःपरलोकेमार्गेनसंकुवितः ननष्टःदेसुग्रीवसमयेमयो-
दायांतिष्ठसमयेमाहासीः वालिपथबालिराजेमार्गेमाग्रन्वताररत्यर्थः २५ ८क्रायेपवविहितेपवमवस्थि
तेसतिपद्मिनतहरि कालव्यतिक्रमोमाभूदितिशेषः ग्रतस्त्वंदतिमेदयः ८। ऊरुष्यस्याफपन्यासः संग्रहे-
णास्मग्रीवदितस्मदर्शनार्थः ८२ मानववंशावहेनेतिलक्षणः ८४ इतिविंशःसर्गःसलक्षणः १ साधुहनसाधु

नसंतापःकुवितःपथापेनवालीस्तौगातः समुपैतिष्ठसुग्रीवमावालिपथमन्वगाः ५९ एकपरवशेणे
वालीयोरोगानिहतोमया ततोनसत्यादतिक्रांतहनिष्यामिसवांधवं ६० एवंविहितकार्येचितिनष्ठ
रुष्यभ तनदूहिनरश्रेष्ठत्वरकालव्यतिक्रमः ६१ ऊरुष्यसत्यमपिवानेस्मरप्रतिशृते यथासमेवहरूप
शापथतेमावालिनेप्रतगतोपमदायेत्वमयपरुपर्मसंवादितेशरैः ६२ सप्रवेजतीव्रविहृहकोपलाल
प्पमानेपसमीक्ष्यदीनेवकारतीव्रामतिश्रुग्रतेजाहरीश्वरमानववंशवहेनः ६३ इत्याषेरामायणे
किष्किंधाकांडेविंशःसर्गः २० सकामिनंदीनमदीनसत्वशोकाभिपन्नंसमुदीर्णकामं नरेंद्रसूनुं
नरेंद्रपुत्रंरामाजन्मपूर्वजमित्युवाच १ नवानरःस्यास्यतिसाधुहंतो

नोपहंतस्थितःस्त्रेहत्तालक्षणे
कर्मणाजनितात्फलान्वयगातिसादिकंहकराज्यतेगतंदेश्यांतमन्यतेसयमूलानितिशेषः ग्रतए
वावानरराज्यलक्ष्मीनमातिवेहियस्मातथातत्प्रकारास्यवृद्धिःप्रतपरिपालनेप्रतिपन्नतनकर्मतेतथा-

पद्धितं २

81

रा॰
वा॰ कि॰
टी॰
८५

तत्रहेतुमाह मतिरिदत्पादिति मतिर्दत्तयेहेतुस्तवप्रसादः प्रतस्तस्यप्रतिकारबुद्धिर्वर्ततइतिशेषः नहेर्यह
मेनानुपालनीयमित्यर्थः ३ तथास्यैवाग्रपितन्नसकोमिवालिपूर्वेणाद्धः विचयमन्वेषणं सुग्रीवेहतन्वातस्मै
राज्यसमर्पणादितिभावः ४ तबेदितार्थविज्ञाप्तितस्सुग्रीवववधप्रहृतिस्त्ववीदितिंतत्सप्रवेदितसमयो॰

मतिर्दत्तयाद्राज्यस्तुविघ्नसक्तस्तवप्रसादात्प्रतिकारबुद्धिः हतोग्रजेपप्लववीरवालिनंतराज्यमे
वैविशुणस्यदेयं ३ तथास्यैकोपमदीणांवेगेनदर्मिसुग्रीवसमतमय हरिप्रवीरैः सहवालिपुत्रो
नरेंद्रपुत्र्याविचयंकरोति ४ तस्मातत्वाणोमत्नमुत्पतेतेनिवे॥ दितार्थंगणांचेद्रकोपि उवाचरामःप
रवीरहंतास्त्ववीदितिंसानुनयंचवाक्यं ५ नाहिवैनद्दियोलोकेपापमेवसमाचरेत्॥ ॥कोप
मार्येणयोहंतिसवीरः पुरुषोत्तमः ६ नेदमयत्वयाग्रात्तसाधुहृतेनलक्ष्मण तांप्रीतिमनुवर्तस्वपूर्वे॥
हतेचसंगते ७ सामोपहितयावाचारूक्षाणिपरिवर्जयन् वक्तुमर्हसिसुग्रीवव्यतीतेकालपर्यये ८

चितं ५ नहीदृशः धर्मज्ञःपापंमेत्रहननाख्यंवसप्त्यहूपं प्रायेणसम्राविवेकेन ६ इदंमित्रहननाख्यंवसायम्
पंवस्त्वयाग्राह्यमिति श्लेष साधुवृत्तेनसाधुत्वेनसाधुतेननाहूर्वेकृतांप्रीतिमनुवर्तस्वपूर्वेहतेसंगतेचसाख्य
वस्मेतिशेषः ७ कालपर्ययेकालातिक्रमेप्रतिकर्मणमेववक्तुमर्हसि कालातिक्रांतइत्येववक्तुमर्हसि

८ नागर्ककिविटिप्पणी: ८२

९ प्रतिसंस्थः प्रतिनिवृत्तहृदननायावसायः ९ कालेतके कोपसंकालाद्दिवजनयंकरे सानुमान्मंदरइवजगा-
मेनयन्दवयः ११ यथोक्तकारी रामस्य तिरोधः वचनस्सुग्रीवप्रतिसेनुवक्तव्यं अनंतरतउपरिसुग्रीवेणवक्तव्य
सोनंतरतउपरिस्ववक्तव्यात्तरस्मादितमन्वा स्त्रोलोच्यपर्यावियितिसवद्यः १२ भ्रातृगमास्याःकामेमाम्नेनार
मोयंचेनानुशिष्टार्थोयथावत्तृहृबर्भमः प्रविवेशगुहांवीरोलक्ष्मणःपरवीरहा १३ ततःशुभमतिः
प्राप्तोभ्रातुःप्रियहितेरतः लक्ष्मणःप्रतिसंरब्धोजगामभवनंकपेः १० शक्रबाणासनप्रख्यंधनुःकाला
तकोपमं प्रगृह्यगिरिशृंगाभंमंदरःसानुमानिव ११ यथोक्तकारीवचनमुत्तरंचैवसोत्तरं बृहस्पतिस
मोविद्वान्मत्वारामानुजस्सदा १२ कामक्रोधसमुत्थेनभ्रातुःक्रोधाग्निनावृतः प्रभंजनइवाप्रीतःप्रय
५४ यौलक्ष्मणस्ततः १३ सालतालाश्वकर्णांश्चतरसापातयन्बहून् पर्यस्यन्गिरिकूटानिद्रुमानन्यांश्चवे
गतः १४ शिलाश्चशकलीकुर्वन्पद्भ्यांगजइवाशुगः दूरमेकपदंत्यक्त्वायथौकार्यवशाद्द्रुतं १५ ताम
मपश्यद्बलाकीर्णांहरिराजमहापुरीं दुर्गामिक्ष्वाकुशार्दूलः किष्किंधांगिरिसंकटे १६ रोषात्प्रस्फु रमा
णोष्ठः सुग्रीवंप्रतिलक्ष्मणः ददर्शवानरान्भीमान्किष्किंधायांबहिश्चरान् १७॥ स्वाहिद्वयात्तज
यसतजन
न्माणः क्रोधसंतस्तसमुत्थनतज्जन्येनक्रोधाग्निनावृतः अतएवाभीताः प्रभंजनोवायुरिवप्रययौ १३ तरसा
वेगेनपर्यस्यन्क्षिपन् १४ एकपदंएकैकपदंदूरंयथाभवतितथात्यक्त्वाकार्यवशाद्द्रुतंययौ १५ व

राकीर्णां वानरसेनां ग्रामां गिरिसंकटे भूतेनमध्यवर्तिनां ७॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४२

रा०
वाटी०
८

वृद्धलक्ष्मणदर्शनभीत्या शैलशृंगाद्दिग्रहोवानराणां ९ ततः सचिवसंदिष्टाः सुग्रीवेणापि त्वातदनुमत्या
लक्ष्मणेन समाभिर्यावत्प्रदेशपतेतावद्वृद्धा लक्ष्मणप्रवेशं तिरस्थानासिद्धतस्थैवं सचिवैः संदिष्टा हरयो नगरा

न्ते दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभं शैलशृंगाणि शतशः प्रवृद्धांश्च महीरुहान् जगृहुः कुंजरप्र
ख्या वानराः पर्वतांतरे ९ तान्गृहीतप्रहरणान्सर्वान्दृष्ट्वा तु लक्ष्मणः बभूव परमक्रुद्धो वह्निरिंधनस्था
नलः ९ ते तं भयपरीतांगाः क्षुब्धं दृष्ट्वा प्लवंगमाः कालमृत्युयुगांताभं शतशो विद्रुता दिशः १० ततः
सुग्रीवभवनं प्रविश्य हरिपुंगवाः क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ११ तारया सहितः कामी
सक्तः कपिवृषो रहः न तेषां कपिसिंहानां शुश्राव वचनं तदा १२ ततः सचिवसंदिष्टा हरयो रोमहर्ष
णाः गिरिकुंजरमेघाभा नगरान्निर्ययुस्तदा १३ नखदंष्ट्रायुधा वीराः सर्वे विकृतदर्शनाः सर्वे शार्दूल
दंष्ट्राश्च सर्वे च विकृताननाः १४ दशनागबलाः केचित्केचिद्दशगुणोत्तराः केचिन्नागसहस्रस्य बभू
वुस्तुल्यवर्चसः १५ किष्किंधां कपिभिर्व्याप्तां महद्भिर्महाबलैः अपश्यल्लक्ष्मणः क्रुद्धः किष्किंधां तां
दुरासदां १६ ततस्ते हरयः सर्वे प्राकारपरिखांतरात् निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतास्तदा १७

स्थिर्ययु १८ कृतदर्शनाः भीमदर्शनाः १९ दशगुणोत्तराः शतनागबलास्तथान्ये: नागसहस्रस्य वर्चसः नागस
हस्रतेजसस्तस्य तेजस्तुल्यतेजसः २० दुरासदामपश्यदित्यन्वयः २१ प्राकारा द्वारदेवीति नीयपरिखा तदंतरात्

82A

प्रमदं च वाद्यानरप्रतिरोधनं च पूर्वजस्य रामस्यार्थे किं च दृष्ट्वाविज्ञायैव पुनरेव क्रोधवशं जगाम १८ दीर्घउसोमहाबाहु॰
क्रोधो यस्य १९ बाणशल्यमिव स्फुरती निष्क्राय सायकासनयुक्तो भोगो यस्य स्वतेजोरूपविषेण संभूतो यान्तः
पंचास्यः पन्नग इव बभूवेति सर्वेणान्वयः २० विषादमगमत् एतावत्पर्यन्तं रामकार्ये तत्स्थितिमिति विषादः २१ ३॰

सुग्रीवस्य प्रमादं च पूर्वजस्यार्थमात्मवान् इक्ष्वाकोपवशं वीरः पुनरेव जगाम सः १८ स दीर्घोष्णमहोच्छ्वा
सः कोपसंरक्तलोचनः बभूव नरशार्दूलः सधूम इव पावकः १९ बाणशल्यस्फुरज्जिह्वः सायकासनभोग
वान् स्वतेजोविषसंभूतः पञ्चास्य इव पन्नगः २० तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितं समासाद्याङ्गदस्त्रा
साद्विषादमगमत्परे २१ सोऽङ्गदं रोषताम्राक्षः संदिदेश महायशाः सुग्रीवः कथ्यतां वत्स ममागमनमित्यु
त २२ एष रामानुजः प्राप्तस्त्वत्सकाशमरिंदम भ्रातृव्यसनसंतप्तो द्वारि तिष्ठति लक्ष्मणः २३ तस्य वाक्ये य
दि रुचिः क्रियतां साधु वानर इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमिदं मम २४ लक्ष्मणस्य वचः श्रुत्वा शोकावि
ष्टोऽङ्गदोऽब्रवीत् पितुः समीपमागम्य सौमित्रिरयमागतः २५ अथाङ्गदस्तस्य वचो निशम्य संभ्रान्तभावः प
रिदीनवक्त्रः निर्गत्य पूर्वं नृपतेस्तरस्वी ततो रुमायाश्चरणौ ववन्दे २६

सुत एवं प्रकारेणेत्यर्थः २२ तं प्रकारं दर्शयति एष इति २३ क्रियतां तदा तन्निदेशोऽस्मीयतामित्यर्थः २४ तदा सं॰
क्रियतां तदत्र वचनमिति शेषः २५ लक्ष्मणस्येति श्लोकोक्तमर्थं विस्तरेणाह अथेति संभ्रान्तभावः संभ्रान्तचित्तः २६

पुरस्तात् त्रिशोपेन दी
नवक्त्रं यस्य स प
रिदीनेति पाठः

तदं निर्गत्य लक्ष्मणसंनिहितदेशात्ताराद्यप्त्यर्थः पूर्वं नृपतेस्ततो रुमाया इदमुपलक्षणं तारायाश्च चरणावित्यन्वयः तदेव विस्तारयति सं
होति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

83

रा॰ वा॰ कि॰ टी॰ ८२

ततेववि 'पुष्पतिमं स्रुघेतिमातस्तारायाः ४७ निद्रायामेतेन संवीतो व्याप्तः नावबुद्धवान् तत्रत्यं तद्वचनं चेत्यर्थः
घेतायद्देनेन विमोहितः मदमत्तश्चव्यसनग्रासीदित्यर्थः ४८ ततः सुग्रीवसमीपगमनानन्तरं तेन क्रुद्धेन लक्ष्मणेन
प्रसादयंतो वानरास्तत्रेत्य भयेन किलकिलाः स्वजातिशब्दं चक्रुः ४९ ततो लक्ष्मणदृष्टा मरैस्त्वतिभिमहान्प्रवाहशब्द

संगृह्य पादौ पुनरग्रतो जानुग्राहमातंश्च नरेव पादौ पादौ स्म मायाश्च निपीडयित्वा निवेदयामास ततस्तमर्थं
४७ स निद्रया सम्संवीतो वानरो न विबुद्धवान् बभूव मदमत्तश्च मदनेन च मोहितः ४८ ततः किलकिला
चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः प्रसादयंतस्तं क्रुद्धं भयमोहितचेतसः ४९ ते महौघनिभं दृष्ट्वा वज्राशनिसमस्व
नं सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ५० तेन शब्देन महता प्रत्यबुध्यत वानरः मदविह्वलताम्राक्षो
गु२ व्याकुलः स्रग्विभूषणः ५१ अथांगदवचः श्रुत्वा तेनैव च समागतौ मंत्रिणौ वानरेन्द्रस्य संमतौ दारदर्शिनौ
५२ प्लक्षश्चैव प्रभावश्च मंत्रिणावर्थधर्मयोः वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतः ५२ ॥

सदृशशब्देन तुल्यादि सदृशशब्दं च समं सहसिंहनादं चक्रुः सुग्रीवोद्बोधनायेति शेषः ५० ५१ अंगदवचः श्रुत्वा ते
नैवांगदेनैव सह दारदर्शिनौ शुतः पुरप्रवेशयोग्यौ मंत्रिणौ वानरेन्द्रस्य समीपमागतौ ५१ कोसौ तत्राह प्लक्ष इ
त्यादि प्रश्नेऽयमंत्रो विषये उच्चावचं वक्तुं प्राप्तं लक्ष्मणं शशंसतः ५२ ॥

८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रसाद्य पितेत्यादि भव सत्यप्रतिश्रव इत्यंतमेकं वाक्यं सार्थनिश्चितैः अर्थनिश्चयसहितैर्वचनैः प्रसादयित्वा श-
शंसेत्यन्वयः ५४ ५५ तस्य भीताः तस्माद्भीताः ५६ वाक्यं रामवाक्यं सारथिर्यस्य व्यवसायः कर्तव्यार्थनिश्चयः

प्रसादयित्वा सुग्रीवं वचनैः सार्थनिश्चितैः आसीनं पर्युपासीनो यथा शक्रं मरुत्पतिं ५४ सत्यसंधौ महा-
भोगौ भ्रातरौ रामलक्ष्मणौ वयस्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ५५ तयोरेको धनुःपाणिर्द्वारि
तिष्ठति लक्ष्मणः यस्य भीताः प्रवेपंते नादान्मुंचंति वानराः ५६ स एष राघवभ्राता लक्ष्मणो वाक्य-
सारथिः व्यवसायरथः श्रीमान् रामस्य शासनात् ५७ अयं च तनयो राजंस्ताराया दयितोंऽगदः लक्ष्मणे-
न सकाशं ते प्रेषितस्त्वरयानघ ५८ सोऽयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् वानरान्वानरपते च-
क्षुषा निर्दहन्निव ५९ तस्य मूर्ध्ना प्रणामं त्वं सपुत्रः सहबांधवः गच्छ शीघ्रं महाराज रोषो ह्यद्योपशाम्य-
तां ६० यथाह रामो धर्मात्मा तत्कुरुष्व समाहितः राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ६१ इत्यार्षे श्री-
रामायणे किष्किंधाकांडे एकत्रिंशः सर्गः अंगदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह लक्ष्मणं कुपितं श्रुत्वा
मुमोचासनमात्मवान् १ स च तानब्रवीद्वाक्यं निश्चित्य गुरुलाघवं मंत्रज्ञान्मंत्रकुशलो मंत्रेषु परिनिष्ठि-

सारथ्यायस्य ५७ ५८ ५९ ६० धर्मात्मा वदतीति शेषः सत्यप्रतिश्रवः सत्यप्रतिज्ञः ६१ इत्येकत्रिंशः सर्गः अं-
गदस्येत्याद्यंगदवचः श्रुत्वेत्यत्र के १ गुरुलाघवं गुरुत्वलघुत्वरूपमर्थं मंत्रज्ञान्मंत्रकुशलः मंत्रप्रयोगकुशलः २

दुर्व्याहृतं प्रत्युचितवचनं दुःकृतं दुरनुष्ठितं प्रत्युचितं कृतं स्वकृतमिति शेषः ३ कोपकारणमुन्नयति अस्वहृच्छ
दिरिति अप्रियोऽस्मन्नपहृदयेतित्यर्थः असंभूतानि अप्रत्युत्पन्नानमिति शेषः ४ अलक्ष्मणकोपविषये तावत्प्रयत्नमभा
वः वेद्यानिश्चयः अध्यवसायः तावन्मात्रो कल्पनशीलेन निपुणं विनयः ५ नावल्वत्मिमग्राशासामदपमायस्वूलशितिशेषः
कित अस्थाने अप्रकारे वासम्भवापराधाभावे परिगृहीतमिथ्यापराधेन कुपितमित्रं संभ्रमं भयजननयत्स्व ६ मि॰

नेमे दुर्व्याहृतं किंचिन्नापि मे दुरनुष्ठितं । लक्ष्मणेनाग्रजभ्रात्रा कृद्धः किमिति चिंतये ३ असुहृद्भिर्म
मामित्रैर्नित्यमन्तरदर्शिभिः । मम दोषानसंभूताञ्श्रावितो राघवानुजः ४ अत्र तावद्यथाबुद्धिः सर्वैरेव यथा
विधि । भावस्य निश्चयस्तावद्विज्ञेयो निपुणं शनैः ५ नखल्वस्ति मम त्रासो लक्ष्मणान्नापि राघवात् । मित्रं [illegible]
त्वस्थानकुपितं जनयत्येव संभ्रमं ६ सर्वथा सुकरं मित्रं दुष्करं परिपालनं । अनित्यत्वात्तु चित्तानां प्रीतिर
ल्पेऽपि भिद्यते ७ अतो निमित्तं त्रस्तोऽहं रामेण तु महात्मना । यन्ममोपकृतं शक्यं प्रतिकर्तुं न तन्मया ८
सुग्रीवेणैवमुक्ते तु हनुमान्मारुतात्मजः । उवाच स्वेन तर्केण मध्ये वानरमंत्रिणां ९ सर्वथा नैतदाश्चर्यं
यत्त्वं हरिगणेश्वर । न विस्मरस्यविस्तव्यमुपकारं कृतं शुभं १० ॥

अस्थानस्थाने न कोपसंभावनायां लोकन्यायमाह सर्वथेति अल्पेप्यपराधे सतीति शेषः ७ अतो निमित्तं
अस्मान्निमित्तात्त्रस्तोऽहं महात्मना रामेण तु यदुपकृतं तत्मया प्रतिकर्तुं न शक्यं अत एव [illegible] तदास्यमे॰
वांगीकरोमीति भावः ८ अथ सुग्रीवमशीहनूमान्कोपनिमित्तं निश्चित्याह सुग्रीवेणेत्यादिना तर्केण ऊहेन ९ नि॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उपकारमेवाद्राघवेणेति १ प्रणिपातकृतेनांजलिबद्धेनस्मितात् २ प्रणयकोपस्य निमित्तंदर्शयतित
मिति कालंप्रतिज्ञातंसीतान्वेषणकालं प्रवृत्ताप्रकर्षेणहता गतप्रायमित्यावत् ३ व्यतिक्रान्तेनेतिशेषः

राघवेणतद्वीरेणाभयमुक्तस्त्वयाहृतः त्वत्प्रियार्थंहतोवालीशक्रतुल्यपराक्रमः १ सर्वथाप्रणयात्
क्रुद्धोराघवोनात्रसंशयः भ्रातरंसंप्रहितवान्लक्ष्मणंत्वन्निवर्तने २ त्वंप्रमत्तोनजानीषेकालंकाल
विदांवर फुल्लसप्तच्छदश्यामाप्रवृत्तातुशरच्छुभा ३ निर्मलग्रहनक्षत्राद्यौःप्रनष्टबलाहका प्रस-
न्नाश्चदिशःसर्वाःसरितश्चसरांसिच ४ प्राप्तमुद्योगकालंत्वंनावैषिहरिपुंगव त्वंप्रमत्तइतिव्यक्तंल
क्ष्मणोयमिहागतः ५ आर्तस्यहृतदारस्यपरुषंपुरुषान्तरात् वचनंमर्षणीयंतेराघवस्यमहात्मनः
६ कृतापराधस्यहितेनान्यत्पश्याम्यहंक्षमं अन्तरेणाञ्जलिंबद्ध्वालक्ष्मणस्यप्रसादनात् ७ नियुक्तै
र्मन्त्रिभिर्वाच्योह्यवश्यंपार्थिवोहितं इतएवभयंत्यक्त्वाब्रवीम्यवधृतंवचः ८ अभिक्रुद्धःसमर्थोहिचा
पमुद्यम्यराघवः सदेवासुरगन्धर्वंवशेस्थापयितुंजगत् ९ नसक्षमःकोपयितुंयःप्रसाद्यःपुन
र्भवेत् पूर्वोपकारंस्मरताकृतज्ञेनविशेषतः १० ॥

षः ४ पुरुषान्तरात् लक्ष्मणात् कृतंपरुषवचनंतेत्वयामर्षणीयं नतुसंभववन्मालक्ष्मणायप्रदेशः ५
६ नियुक्तैः हितोपदेशार्थंनियोगः प्रवदन्निश्चितं ८ ९ यःपुनःप्रसाद्योभवेत् नकोपयितुंनक्षमेनयुक्तः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

85

रा० वा० कि० टी० ८५ पै

प्रयोहितं तु पेदिवं स्वैरं इव वृत्तः स च राघवस्य लक्ष्मणस्यास्य रामस्य मानुषं मत्यमतिक्रांतं बलं तेमनोज्ञा-
स्यतिज्ञानात्येव वालिवधादिनेतिभावः ॥ द्वात्रिंशः सर्गः ॥ अथ प्रवेशमद्ध्वनानन्तरं प्रतिसमादिष्टः सुग्रीवप्रे-
षितेनांगदेन प्रत्येत्य समाहूतः १ स्थिता द्वारयः प्रत्ञ्जलयो बभूवुरित्यन्वयः २ नचैनं पर्यवारयन् पनं लक्ष्मणं

तस्य मूर्ध्ना प्रणम्यातं सपुत्रः समहाजनः राजं स्निह्य समयेभ्यो भीर्यैव तद्वशे ॥ न रामस्य मानु-
तयासमनेनवाकोपादपुत्रमनसाप्यपोहितं मनोरितेत्तास्यतिमानुषवलस्य राघवस्यास्य स्वैरं इव
वृत्तः ॥ इत्येद्वात्रिंशः सर्गः ॥ अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा प्रविवेश गुहां रम्यां किष्कि-
न्धां रामशासनात् १ द्वारस्था हरयस्तत्र महाकाया महाबलाः बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्रांजलयः
स्थिताः २ निश्वसंतं ततस्तं दृष्ट्वा क्रुद्धं दशरथात्मजं बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन् ३ स तां रत्न-
मयीं दिव्यां श्रीमत्पुष्पितकाननां रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहां ४ हर्म्यप्रासादसंबाधां
नानारत्नोपशोभितां सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितां ५ देवगंधर्वपुत्रैश्च वानरैः कामरूपि-
भिः दिव्यमाल्यांबरधरैः शोभितां प्रियदर्शनैः ६ चंदनागुरुपद्मानां गंधैः सुरभिगंधितां मैरेयाणां

परिवार्यं गंतुमयेनन्नाशक्नुवन्नित्यर्थः ३ रत्नसमाकीर्णां अनेकीकृतमवस्त्राक्रांतां ४ तस्यैव प्रपंचः हर्म्ये-
तिसर्वकामफलैः सर्वदापेक्षितफलयुतैः ५ ६ पद्मपद्मकाख्यगंधद्रव्य मधूनां च गंधैरिति शेषः ७ ॥

५२

८५

85A

प्रासादैः शोभितामित्यन्वयः गिरिनद्यः गिरिभ्यः प्रस्रुता नदीत्यर्थः ८ ९ १० ११ १२ १३ पांडुरेण शैलेन परिक्षिप्तं·

विंध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः ददर्श गिरिनद्यश्च विमलास्तत्र राघवः ८ अंगदस्य गृहं रम्यं
मैंदस्य द्विविदस्य च गवयस्य गवाक्षस्य शरभस्य गजस्य च ९ विद्युन्मालेश्च संपातेः सूर्याक्षस्य हनूम
तः वीरबाहोः सुबाहोश्च नलस्य च महात्मनः १० कुमुदस्य सुषेणस्य तारजांबवतोस्तथा दधिवक्त्रस्य
नीलस्य सुपाटलसुनेत्रयोः ११ एतेषां कपिमुख्यानां राजमार्गे महात्मनां ददर्श गृहमुख्यानि महासारा
णि लक्ष्मणः १२ पांडुराभ्रप्रकाशानि दिव्यमाल्ययुतानि च प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च १३
पांडुरेण तु शैलेन परिक्षिप्तं दुरासदं वानरेंद्रगृहं रम्यं महेंद्रसदनोपमम् १४ शुक्लैः प्रासादशिखरैः कैला
सशिखरोपमैः सर्वकालफलैर्वृक्षैः पुष्पितैरुपशोभितं १५ महेंद्रदत्तैः श्रीमद्भिर्नीलजीमूतसन्निभैः दि
व्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः १६ हरिभिः संवृतद्वारं बलिभिः शस्त्रपाणिभिः दिव्यमाल्यावृतं
शुभ्रं तप्तकांचनतोरणं १७ सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः अवार्यमाणः सौमित्रिर्महाभ्रमिव
भास्करः १८ स सप्तकक्ष्या धर्मात्मा यानासनसमावृताः प्रविश्य सुमहद्गुप्तं ददर्शांतःपुरं महत् हैम
राजतपर्यंकैर्बहुभिश्च वरासनैः महार्हास्तरणोपेतैस्तत्र तत्र समावृतं २० ॥

स्फटिकशिलामयप्राकारपरिवेष्टितं १४ १५ महेंद्रदत्तैर्वृक्षैः कल्पवृक्षैः १६ १७ १८ १९ सप्तकक्ष्याः द्वारान्तरस्थानि

कष्मतिप्रोगः २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

86

रा॰ वा॰ कि॰ टी॰ ८८

तंत्रीगीतेन वीणावाद्यघोषेण सहितं मधुरस्वनं मुरजादेः शुश्राव २१ वरमाल्यकृतव्यग्राः उत्तमाल्यानां वरस्र
जां यत्संग्रथनकारणेन व्यग्राः २२ न व्यग्रान् परिचर्यासु अवरोहितान् नात्युदात्तपरिच्छदान् तान् दृष्ट्वा स्वाभरणस
स्यादिकात् २४ लज्जितोभवत् परस्त्रीदर्शनादिति शेषः २५ रोषवेगेन प्रचलितः प्रवृद्धकोपः श्रामरणस्वनं स्फ

प्रविशन्नेव सततं सुश्राव मधुरस्वनं तंत्रीगीतसमाकीर्णं समतालपदाक्षरं २१ बह्वीश्च विविधा
कारा रूपयौवनगर्विताः स्त्रियः सुग्रीवभवने ददर्श स महाबलः २२ दृष्ट्वाभिजनसंपन्नाश्चित्रमाल्यकृत
स्रजः वरमाल्यकृतव्यग्रा भूषणोत्तमभूषिताः २३ नातृप्तान्नापि चाव्यग्रान्नानुदात्तपरिच्छदान् सुग्रीवा
नुचरांश्चापि लक्षयामास लक्ष्मणः २४ कूजितं नूपुराणां च कांचीनां निनदं तथा स निशम्य ततः श्रीमा
न् सौमित्रिर्लज्जितोभवत् २५ रोषवेगप्रचलितः श्रुत्वा चाभरणस्वनं चकार ज्यास्वनं वीरो दिशः शब्देन पू
रयन् २६ चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः तस्थावेकांतमाश्रित्य रामकोपसमन्वितः २७ तेन
चापस्वनेनाथ सुग्रीवः प्लवगाधिपः विज्ञायागमनं त्रस्तः संचचाल वरासनात् २८ ॥

त्वा स्त्रीणां ततो निवृत्तये ज्यास्वनं चकार २६ तदेवाह चारित्रेणेति चारित्रेण स्त्रीसभायां प्रवेष्टुं नोचितमित्याद्य
शीलावनयापकृष्टः निवर्तितोऽतः पुरप्रवेशः स तेकांतमेत्याश्रित्य रामकार्यानिवृत्तिदर्शनजकोपेन समन्वितस्त ८६

86A

२९ णमाख्यातः बोधितालक्ष्मणागमनः उपशुश्यते उपाशुश्यं १० २१ रोषस्यानेरोषकारणसमापराधे २२ २४
निनितकोपासेमेवाञ्चिमितेवानिणीयास्वस्यसमीपगमनमउवितमितियद्वांतरंगृह्णातिग्रथवेति २५ वि॰
ग्रंगदेनयथामतंभुरस्तात्मनि विदितं सव्यन्नमेषसंग्रामः सौमित्रिर्भीतवत्सलः २९ ग्रंगदेनसमा
ख्यातेज्यास्वेनेनचवानरः बुबुधेलक्ष्मणंप्राप्तमस्विचास्यापशुश्यत २० ततस्तारांगदाभ्यां प्रह्वः सुग्रीवः प्रिय
दर्शनां श्वावदितमव्यग्रस्वास्तसंभ्रांतमानसः २१ किंतारेकारणंसप्तप्रकृत्यामृदुमानसः सरोषइ
वसंप्राप्तो येनायंराघवानुजः २२ किंपश्यसिकुमारस्यरोषस्थानमनिंदिते नत्वकारणकोपमाहे
रशंभावः २३ यद्यसौकृतमस्माभिर्बुध्यसे किंचिदप्रियं तद्भ्रातासत्प्रयायेणोक्षिप्रमेवाभिधीयतां २४
ग्रयवास्वयमेवैनंहृष्टुमर्हसिभामिनि वचनैःसांत्वयुक्तैश्चप्रसादयितुमर्हसि २५ त्वद्दर्शनेविशुद्धात्मा
नस्मकोपंकरिष्यति नहिस्त्रीषुमहात्मानःक्वचित्कुर्वंतिदारुणं २६ त्वयासांत्वैरुपक्रांतंप्रसन्नेंद्रिय
मानसं ततःकमलपत्राक्षंद्रष्टास्यहमरिंदमं २७ साप्रस्खलंतीमदविह्वलाक्षीप्रलंबकांचीगुण
पहास्तागतस्त्रायातं । हेमसूत्रा सलक्षणालक्ष्मणसन्निधानंजगामतारानमितांगयष्टिः २८ ॥ कस्यणाः २९
उपक्रोधसमारंभमतमायणं २७ २७ प्रस्खलंतीमदालसतयापादयोःस्खलंतीमदविह्वलाक्षीभोगासवृहेन
मधुपानमथयनमदेनाममसवाकितनेत्रा कांचीगुणाश्च यमा प्रलंबकांचीगुणहेमसूत्रेयस्याः सितांगयष्टिः

रामकोऽकृतिरोषः २८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

87

रा.
वा.कि.
टी.
८

४४ प्रणयप्रगल्भं मैत्रीसमर्थेन समर्थं ४५ वञ्चिते देशे च गुरुशिष्टकार्यार्थमुद्यते प्राप्ते तं त्वं दिग्यातिष्ठंते ४७ भू
यः पिके प्रणयप्रकाशः पूर्वैः दृष्टोऽर्थो यस्मिन्नस्तु ४८ प्रयुंते मतो कामवृत्ताः लक्ष्मणधर्मार्थसंग्रहश्च वर्तते ४९ सु
ग्रीवं मित्रमिन्द्रियः पतंकिं तु वध्यसे ५० लक्ष्मणधर्मेति तमेवाहनेति शास्त्रार्थराज्यप्रयोजने समात्यापरिषदस्य

सतां समीक्ष्यैव हरीशपत्नी तस्यानुदासीन तया महात्मा अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः स्त्रीसन्निकर्षा
द्विनिवृत्तकोपः ४९ मा पानयोगाद्विनिवृत्तलज्जा दृष्टिप्रसादाच्च नरेन्द्रसूनोः उवाच तारा प्रणयप्रगल्भं
वाक्यं महार्थं परिसान्त्वपूर्वं ५० किं कोपमूलं मनुजेन्द्रपुत्र कस्ते न संतिष्ठति वाङ्निदेशे कः शुष्कवृक्षं वनमापतन्तं
दवाग्निमासीदति निर्विशंकः ५१ स तस्या वचनं श्रुत्वा सान्त्वपूर्वमशङ्कितः भूयः प्रणयदृष्टार्थं लक्ष्म
णो वाक्यमब्रवीत् ५२ किमयं कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः भर्ता भर्तृहिते युक्ते न चैनमवबुध्यसे
५३ न चिन्तयति राज्यार्थं नास्माञ्छोकपरायणान् सामात्यपरिषत्तारे पानमेवोपसेवते ५४ स मासांश्च
तुरः कृत्वा प्रमाणं प्लवगेश्वरः व्यतीतांस्तान्मदव्यग्रो विहरन्नावबुध्यते ५५ न हि धर्मार्थसिद्ध्यर्थं पान
मेवं प्रशस्यते पानादर्थश्च कामश्च धर्मश्च परिहीयते ५६ धर्मलोपो महांस्तावत्कृते ह्यप्रतिकुर्वतः

तारद्दोषास्त्वेतिशेषः ५७ विहरन्नत्वयाक्रीडन् ५७ ५८ पानादर्थादिनाशमुपपादयति धर्मेति कृते उपका
रे अप्रतिकुर्वतः प्रत्युपकारमकुर्वतो महान्धर्मलोपो भवेत् प्रत्युपकाराकरणाद्गुणवतो मित्रस्य नाशो भवति

८१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

87A

उक्तमेवार्थं दृढयति मित्रेहीति अर्थगुणश्रेष्ठं मित्रार्थसाधनलक्षणश्रेष्ठगुणयुक्तं सत्यधर्मपरायणं प्रत
गुणाढ्यं युक्तं च मित्रं चेदिष्टं प्रसिद्धं तत्तद्वयं गुणाढ्यं समर्पितवन्मंत्रीपरित्यक्तमेव धर्मे तेमित्रोपालनरूपधर्मेण व्यव
स्थितः सोपि परित्यक्त इत्यर्थः ५८ तत्तस्मादेवं सति इहकार्यतत्त्वे तु प्रस्तुते प्रस्तुते कार्ये प्रस्तुते कार्ये मया अस्माभिः
कार्यं कर्तव्यं तदुदाहर्तुमर्हसि ५९ धर्मार्थसमाधियुक्तं धर्मार्थयोः संपादकं वाक्यं निशम्य यतार्थ्याश्रुवन

मित्रेत्यर्थगुणश्रेष्ठं सत्यधर्मपरायणं तत्तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितं ५८ तदेवं प्रस्तुते का
र्ये कार्यमस्माभिरुत्तरं यत्कार्यं कार्यतत्त्वज्ञ तदुदाहर्तुमर्हसि ५९ स तस्य धर्मार्थसमाधियुक्तं निशा
म्य वाक्यं मधुरस्वभावा तारागतार्थं मनुजेन्द्रकार्ये विश्वासयुक्तं तमुवाच भूयः ६० न कोपकालः क्षि
तिपालपुत्र न चापि कोपः स्वजने विधेयः त्वदर्थकामस्य जनस्य तस्य प्रमादमप्यर्हसि वीर सोढुं ६१ कोपं
कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्त्वे कस्त्वद्विधः कोपवशं हि गच्छेत् सत्त्वावरुद्धस्तपसः प्रसूतिः

मानुजे

तथा योजना तारा मनुजेन्द्रकार्ये तद्विषये विश्वासयुक्तं यथा तथा भूयः पुनरुवाच ६० न कोपकालः त्वदर्थस्या
नतीतत्वादिति भावः त्वदर्थकामस्य त्वत्प्रयोजनपरस्य ६१ अपराधस्य सोढव्यतां समर्थयति कोपं कथं
नामेति अपकृष्टसत्त्वे सत्त्वगुणाद्धीने तद्वदित्यर्थः सत्त्वावरुद्धः रजस्तमसोरननुप्रवेशाय सत्त्वगुणेनानिरुद्धः
तपसः प्रसूतिः उपशमरूपतपस उत्पत्तिस्थिते ६२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रा॰
वाकि॰
टी॰
८८

प्रसादोवन्निवारयंतीत्वितद्धेतुंनजानासीत्यतआहजानामीति हरिवीरवंश्योःरामस्यकोपंकोपनिमित्तं
जानामिकार्यस्यउपयोगस्यकालेसमागविलंबंचजानामि त्वयिपदर्शितेकर्यराज्यदानलक्षणोपकारेत्वयाकृते·
तदपिजानामिपदत्रकार्येप्रसिद्धुपकारेःस्वामिपंत्सीतान्वेषणादिकेकर्तव्यतद्यापिजानामि ५२ हेनर
श्रेष्ठशरीरजनस्यकामस्यबलंयथाप्रविष्टस्तत्तद्यापिजानामि प्रभुसुग्रीवंयस्मिन्जनेकामेनासक्तमनवरतम
रूढंतस्मिंजनेजानामि ५४ लक्ष्मणस्यभापशमनार्थंसशागल्भेनलोकेमकिमाहनकामातनचेत्याह नव

जानामिकोपंहरिवीरबंधोजानामिकार्यंसमुवकालसंगं जानामिकार्यंत्वयिपत्कृतंनस्तद्यापिजानामि
पदत्रकार्यं ५३ तद्यापिजानामियथाविषयत्बलेनरश्रेष्ठशरीरजस्य जानामियस्मिंश्चजनेवरूढकामे
नस्तुग्रीवमसक्तमद्य ५४ नकामतंत्रेतवबुद्धिरस्तित्वंवैयथामन्युवशंप्रपन्नः नदेशकालौहियथार्थध·
र्मावेक्षतेकामरतिर्मनुष्यः ५५ तंकामवृत्तंममसंनिकृष्टंकामाभियोगाच्चविमुक्तलज्जं क्षमस्वतावत्

यथायेनप्रकारेणमन्युवशप्रपन्नस्तेनकारेणत्वकामस्वभावपरिज्ञातेतवबुद्धिर्नास्ति कामतंत्राभिसु
ताहशानेहशीतिभावः हियस्मात्कामरतिर्मनुष्योयथादेशकालौभोगयोग्यायोग्यौपानजानातितथार्थधर्मा·
वपिनावेक्षते मनुष्योपिनजानातिकिमुततिर्यंजातीतिभावः ५५ ममसंनिकृष्टंस्वभायायाममसमीपेका·
मवशाहतंमानेकामाभियोगात्कामावेशात् क्षमस्वेतिपरवशाश्रतापराधत्वात्स्वभातत्वाच्चक्षतेमेवापये

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

88A

कामवशात्त्वनारोपैवेत्याहमहर्षयइति कामेकाम्भोगाग्रहकामाः अभिलाषयेषांते अतएवस्त्रीषुप्रतिबद्ध-
मोहाः अयंतुकपिस्तत्रापिराजा ५७ भर्तोद्दितमुदिश्यनिशाचः ५८ विराजमाः त्वद्धाममनासर्वमेवनिशायः
५९ कोदीयमनेत्यस्यवद्धत्वेनात्यर्थं ६० बाविंचेरादितिअतः पुरस्यावलोकनमनुचितमिमित्यमित्यत्रैवतिष्ठता
महर्षयोयायमंतपोभिकामैःकामानकामाः अतिवृद्धमोदाः अयंप्रकृत्याचपलःकपिस्तकथंनमुद्येत
सावधुराजा ५७ इत्येवमुक्ताबृचनमहार्थसावानरीलक्ष्मणमप्रमेयं पुनः सखेलंमदविक्लवाक्षीभर्तु
र्हितावाक्यमिदंबभाषे ५८ उद्योगस्त्वचिरादिमः सुग्रीवेणनरोत्तम कामस्यापिविधेयेनतवार्थप्रति
साधने ५९ आगतादिमहावीर्यादरयःकामरूपिणः कोटीशतसहस्राणिनानानगनिवासिनः ६०
तदागच्छमहाबाहोचारित्रंरक्षितंत्वया अच्छलंमित्रभावेनसतांदारावलोकनं ६१ तारयाचाप्यनुज्ञात
स्त्वरयाचापिचोदितः प्रविवेशमहाबाहुरभ्यंतरमरिंदमः ६२ ततः सुग्रीवमासीनंकांचनेपरमासने
महार्हास्तरणोपेतेददर्शादित्यसन्निभं ६३ दिव्याभरणचित्रांगंदिव्यरूपंयशस्विनं दिव्यमाल्यांबरधरंमहे
न्द्रमिवदुर्जयं ६४ दिव्याभरणमाल्याभिःप्रमदाभिःसमंततः संरब्धतररक्ताक्षोबभूवांतकसन्निभः ६५
त्वयासताचारोरक्षितइतिभावः मित्रभावेननतुविकारेणसतांदारावलोकनंअच्छलमदोषावहमित्यर्थः
६१ त्वरयाआगमनोत्ताकरणभूतया ६२ ६३ ६४ प्रमदाभिःसमंसुग्रीवंददर्शततः संरब्धतररक्ताक्षोबभूव

रामा० ३३ ॥

पतिस्यावस्थितएवसदृशोत्मन्वयः ११ इतिविंशः अधुनातिदेशं केनापिप्रतिवद्धं १२ अनुक्तेत्यतः पश्चादुस्थि
तेवारि ४ संचचारसमुन्नमानगाम अवस्थितोवसुवेत्यस्यलक्षणंइतिशेषः कल्पवृक्षोपमयासर्वस्तितवे
वगय ५ सत्तारंशिशोनामवस्थित ६ सत्वाविनत्राभ्यासेयतः ७ अयमेस्थितः अयमेमागेस्थः ८ प्रहृतोयत्र

दृष्टांतवीरः परिविभ्यगाढंवरासनस्यावरेहेमवर्णः ददर्शसौमित्रिमदीनसत्वंविशालनेत्रंसविशा
लनेत्रे ११ इत्यादिरामायणोक्तिकिष्किंधाकांडेसविंशः तमप्रतिरतेनुद्दष्टविहृषरूपषीम सुग्रीवोलक्ष्मण
दृष्ट्वा वभूवव्याधितेंद्रियः १ कृद्धंनिश्वसमानेतंप्रदीप्तमिवतेजसा भ्रातुर्व्यसनसंतप्तंसंदृष्ट्वादशरथात्मा
त्मजे २ उत्पपातनरश्रेष्ठोदितत्वासौवर्णमासनं महान्महेंद्रस्यथयास्वलंकृतइवध्वजः ३ उत्पतंत
मनुत्पेतुः [illegible]रुमाप्रभृतयःस्त्रियः सुग्रीवंगगनेपूर्णचंद्रंतारागणाइव ४ संरक्तनयनः
श्रीमानसंचचारकृतांजलिः वभूवावस्थितस्तत्रकल्पवृक्षोमहानिव ५ रुमाद्वितीयंसुग्रीवंनारीम
ध्यगतंस्थित अब्रवील्लक्ष्मणःकृद्धः सतारंशशिनंयथा ६ सत्वाभिजनसंपन्नः सानुक्रोशोजितेंद्रियः
कृतज्ञःसत्यवादीवराजालोकेमहीयते ७ यस्तुराजास्थितोधर्मे मित्राणामुपकारिणां मिथ्याप्र
तिज्ञामसत्यदोषमादृशानमिति पकास्त्वविषयात्तेनेदानादिप्रतिज्ञा विज्ञाते सतिसोऽनृतवाक्शतंदंतिशाता
वहननदोषभागभवेदित्यर्थः पत्रगावोनृतेमदृस्वहंतिनरःस्वर्गोहननदोषभागभवेत् पुरुषानृतेनुरुषविष

89A

प्रथकृतवद्भेषमारस्वंमितिकृतार्थोस्मिदैरितिशेषः सर्वभूतानांसलोकानांवध्यःसर्वलोकवाहिकार्थंत्र
स्पः १० नायमर्थः स्वकल्पनामात्रकल्पितःइत्याहगीतश्लि सर्वलोकनमस्कृतः सर्वस्मन्तेसमतत्स्यर्थः ११ स
जेनोहकृतच्चसत्त्वादस्वंमिति १२ कर्तव्यकृतम्भसत्त्वादस्वमिति १३ कर्तव्यप्रत्युपकारमाहनविति दृती
एवंकृतार्थोस्मित्राणांनभवतामतिकरोतियः १४ कृतघ्नःसर्वभूतानांसवध्यःसवगोचर १५ गीतायंवक्ष
सर्वसु णाश्लोकः सर्वलोकनमस्कृतः इत्याहकृतघ्नेत्यहेनततेविवार्थसंवाम १६ गोघ्नेचैवसुरापेचचौरेभग्नव्रु
तेतथा निष्कृतिर्विहितासद्भिःकृतघ्नेनास्तिनिष्कृतिः १७ प्रत्यार्थस्वकृतघ्नश्चमिथ्यावादीचवानर एवं
कृतार्थारामस्यनततमतिकरोषियत १८ नचनामकृतार्थेनत्वयारामस्यवानर सीतायामार्गणीयत्नः
कर्तव्यःकृतमिच्छता १९ सत्वंकाम्येषुभोगेषुसक्तोमिथ्याप्रतिश्रवः नत्वांरामोविजानीतेसर्पमंडूकरा
रा विणं २० महाभागेनमेणायापःकरुणावेदिना हरीणांप्रापितोराज्यंत्वंदुरात्मामहात्मना २१ कृतंच
वामिजानीषेराघवस्यमहात्मनः सद्यस्त्वंनिषितैर्बाणैर्हतोद्रक्ष्यसिवालिनं २२ नचसंकुचितःपंथा
येनवालीहतोगतः समयेतिष्ठसुग्रीवमावालिपथमन्वगाः २३ ॥
मेवकृताऽपकारंस्मरता १९ सर्पमंडूकराविणंस्वगृहीतसारवस्यमंडूकशब्देनशब्दवंतंसर्पंयथाजनोऽनवलो·
कनात्मंडूकमेवजानातितनतसर्पं तथातवस्वरूपरामोनाज्ञासीदितिभावः २० पापस्त्वमित्यन्वयः २१ २२ २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१०

रा. वाकि टीं ५५

रामसंदिष्टं वाक्यमभिधाय प्रकृतकार्यं विचिन्त्य वाक्यमाह ननूनमिति धृतं यद्ब्रह्मवरस्य कार्मुकं काग्रन्थान्वयेन
न वज्रसन्निभाञ्चयष्पसितात्प्राणीः नूनं ततो नाम तस्मात्स्तस्त्वं निषेवसे सुग्रीव सन् रामकार्यं मनसा
पिनावेक्षसे न चिन्तयसीत्यर्थः ४९ इति चतुस्त्रिंशः सर्गः ३४ तारेतीत्यदेतत्रैनेवेत्यादि ग्रन्थकर्षाः नूनत्वा
ननूनमित्याज्ञवरस्य कार्मुकं च्युतं ध्रुतांशरान्वयष्पसिवज्रसन्निभान् ततः सुखं नाम निषेवसे सुग्रीव न
रामकार्यं मनसाप्यवेक्षसे ४९ इत्यार्षे रामायणे किष्किन्धाकाण्डे त्रिंशः सर्गः ३४ तथा ब्रुवाणं सौमि
त्रिं प्रदीप्तमिव तेजसा अब्रवील्लक्ष्मणं तारा ताराधिपनिभानना १ नैवं लक्ष्मण वक्तव्यो नायं परुषम
र्हति हरीणामीश्वरः श्रोतुं तव वक्त्राद्विशेषतः २ नैवाकृतज्ञः सुग्रीवो न शठो नापि दारुणः नैवान्
तकथो वीर न जिह्मश्च कपीश्वरः ३ उपकारं कृतं वीरो नाप्ययं विस्मृतः कपिः रामेण वीर सुग्रीवो यदन्यैर्दुः
ष्करं रणे ४ रामप्रसादात्कीर्तिं च कपिराज्यं च शाश्वतं प्राप्तवानिह सुग्रीवो रुमां मां च परंतप सुदुः
खशायितः पूर्वं प्राप्येदं सुखमुत्तमं प्राप्तकालं न जानीते विश्वामित्रो यथा मुनिः ६ घृताच्यां किल संसक्तो
दशवर्षाणि लक्ष्मण अहोमन्यत धर्मात्मा विश्वामित्रो महामुनिः ७ स हि प्राप्तं न जानीते कालं कालं
क. १५५ यदि न कृतघ्नः कथं तर्हि कालात्ययापनमित्याशङ्क्याह सदुःखे विदांवर विश्वामित्रो महाते
ति स कथं राम वस्तु तदुःख काल प्राप्तकाले प्रवश्यकर्तव्य ८ अश्रुताबाधो शाद्वोमेन कायादि भिना मातस्मिति

नीः किष्किन्धां प्रस्थापस्थितः २॥

गु. वालकोटैर्नविनिय: ग्रहः दिने ८॥

90A

दूर्यमंगतस्यशरीरभावंप्राप्तस्य ९ अपरायमंगीकृत्यसांत्वयित्वा इदानीं विचार्यमाणेअपरायएव ना
स्तीत्याह नचेति निश्चयार्थे निश्चयरूपमर्थं सुग्रीवाभिप्रायमितियावत् १० रोषेणसमुत्पन्नःसंरंभःक्षोभः
११ १३ १४ कथमयंरावणोहन्तव्यतीत्यत्रतत्सहायकसाध्यत्वात्देषस्येत्याहशतेति यथासंख्याविवक्षितेव
दशकोटिःसमुद्रःशतकोटिमध्यमध्यानांसहस्रंतथापाषष्टिलक्षयाधिकाचैलक्षाणि तेउपरिपरिषट्त्रिंशत्सह

दूर्यमंगतस्यास्यपरिश्रांतस्यलक्ष्मण अविलम्बस्यकामेश्वरामकृतमिहाईति ९ नचरोषवशंता
तगन्तुमर्हसिलक्ष्मण निश्चयार्थमविज्ञायसहसाप्राकृतोयथा १० शांतिवचनादिप्रकृषास्यमहीयाःशु
कृषर्षभ अविमृश्यनरोषस्यसहसायातिवश्यतां ११ प्रसादयेन्त्वायमेतसुग्रीवार्थसमाहिता म
हात्मरोषःसमुत्पन्नःसंरंभस्त्यज्यतामयं १२ समामाकोपिराज्यवचनयान्यपश्यनिव रामप्रियार्थसुग्रीव
स्त्यजेदितिमतिर्मम १३ समानेष्यतिसुग्रीवःसीतयासहराघवं शशांकमिवरोहिण्यदृष्ट्वातरावण
रणे १४ शतकोटिसहस्राणिलंकायांकिलरक्षसां अयुतानिचषट्त्रिंशत्सहस्राणिशतानिच १५ ग्र
हवांताश्चयूथपान्कासान्कामरूपिणः अशक्योरावणोहन्तुंयेनसामैथि
स्राणितउपरितावंतिशता
नीत्यर्थः १५ ९ तावत्तावेपपरसभस्यापिसहापापेहासेन्त्याहेतेइति यस्मात्सहायेनरामेणमेहत्वम
शक्याः यस्माद्रावणश्चक्रूरकर्माक्रूरपराक्रमस्तस्माद्विशेषतः सुग्रीवेणसहायेनप्रयोजनमस्तितस्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९१

रा॰
वा॰कि॰
टी॰
३९

नत्वधारतः संस्थानंयथाकथंचंतत्कालंतत्रारूपवमिति आगामसुनमेध्यकः रावणस्येवंवलशामिप्रकास्तनम॰
यात्नानः श्रवणात् तन्मुखेतोवाक्याच्छ्रवणात्तेरव्यामारेब्रवीमीत्यर्थः १८ मदुपसर्पणादनमेवाहत्वरितमि १९ २॰
तेनद्विकदाद्यागमिष्यतितत्राहदृश्यतेति दूसामित्र श्रुत्समानान्वेषणकार्यविषयेसुग्रीवेणप्रात्वदागमनात्सवमे
वमेस्यावाच्यस्याचिपवनात्राहधृमागनच्छमित्यवेत्रूपायथायेनप्रकारेणकृतानतथा अयमसिमिन्नितेतमेहावले

एवमाख्यातवान्वालीसन्वमिश्रोहरीश्वरः आगामसुनमेध्यकः श्रवणान्नब्रवीम्यहं १९ तत्सह्रायनिमि
त्तोदिश्यषितावरीगवाः आनेतुंवानरान्युद्धेसुवहून्दिग्रुगवान् १९ तांश्चप्रतीक्षमाणायंविक्रांतात्सुम
नृ॰ हावला राघवस्यार्थसिद्धयर्थनिर्यातिहरीश्वरः २० कृतान्तसस्यासौमित्रिः सुग्रीवेणयथाधुरा अयतेत
वानरैः सर्वैरागतत्वमहावलैः २१ शतकोटिसहस्राणिगोलांगूलशतानिच अयुतानिशपयास्यतिजाट
कोपमर्द्दम कोङ्गानेकास्केकाञ्जैत्यकपीनांहीमततेजसां २२ तवद्रिमत्वमिदानीरोष्मकोपान्वितेन
समेनपवैनिरीक्षमाणाः हरिवरवनितानयांतिशांतिप्रथममभयस्याहिशांकिताः समस्ताः २३ ॥

गांतत्वमितियोजना २१ रवः स्नापेत्वयास्वसेनाधिक्यमाह अदेति शतकोटिसंख्यतहृशागुणतिम
कामहस्रकोटिः तत्संख्याः स्मृताः गोलांगूलानांशतानिच शतकोटिः अनेकपयोऽमेकाकोटयः असंख्य
इत्यर्थः २२ हरिवरवनितास्तवेदृसंवितिरीक्ष्य प्रथममभयस्याहिशांकिताः वालीवधजनितभयशंकिताः सत्यः
रोषाहेतोः वेतन्नसमेतयभेनिरीक्षमाणाः शांतिंन्यांतिप्रथममभयस्यातिकर्मणिषष्ठी २३ ॥ ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९१A

इतिपञ्चविंशः सर्गः ३५ तस्मिन्ताराऽनुनयवाक्ये १ मान्यंमालांबहुगुणांबहुविधकाममदकारंमद्यरि
त्य १ लक्ष्मणंसंप्रदर्शयन्नित्यन्वयः ५ ५ कः शक्तः समर्थः तस्यदेवस्य दिव्यानंतगुणभूषितस्यस्वेनक

इत्यार्षेरामायणेकिष्किंधाकांडेपंचविंशः सर्गः ३५ इत्युक्तस्तारयावाक्यंप्रश्रितंधर्मसंहितं मृ
दुस्वभावः सौमित्रिः प्रतिजग्राहतद्वचः १ तस्मिन्प्रतिगृहीतेतुवाक्येहरिगणेश्वरः लक्ष्मणात्सु
महत्त्रासंवस्त्रंक्लिन्नमिवात्यजत् २ ततः कंठगतंमाल्यंचित्रंबहुगुणंमहत् चिच्छेदविमदश्चासीत्सुग्री ८३
वोवानरेश्वरः सलक्ष्मणंभीमबलंसर्ववानरसत्तमः ३ अब्रवीत्प्रश्रितंवाक्यंसुग्रीवः संप्रहर्षयन्
४ प्रनष्टाश्रीश्चकीर्तिश्चकपिराज्यंचशाश्वतं रामप्रसादात्सौमित्रेपुनः प्राप्तमिदंमया ५ कः श
न४ क्तस्तस्यदेवस्य[illegible]ख्यातस्यस्वेनकर्मणा तादृशंविक्रमंवीरप्रतिकर्तुमरिंदम ६ सीतांप्राप्स्यतिधर्मा
त्मावधिष्यतिचरावणं सहायमात्रेणमयाराघवः स्वेनतेजसा ७ सहायकृत्यंकिंतस्ययेनसप्त
महाद्रुमाः गिरिश्चवसुधाचैवबाणेनैकेनदारिता ८ धनुर्विस्फारयाणस्ययस्यशब्देनलक्ष्मण
सशैलाकंपिताभूमिः सहायैः किंतुतस्यवै ९ अनुयात्रांनरेंद्रस्यकरिष्येऽहंनरर्षभ गच्छतोरा
संख्यायत्तंभंगवालिव वणंहंतुंवैरिणंसपुरःसरं १० ॥ख्यादिनाख्यातस्य ६ सहायमात्रेणोपलक्षितः तादृशंतज्जनितो
स्वयमेवार्थसाधकः अहंतुतस्यपरिकरमात्रमितिभावः ७ ८ ९ अनुयात्रायात्राऽऽगमन १० ॥ पकारसदृशं

९२

ग० वा० कि० टी० ८२

विश्वासात् अयं सर्वं क्षमिष्यतीति निश्चयात् प्रणयेन वा यदि किंचिदतिक्रान्तमपराद्धं तदुक्तं हेतुस्वयं प्रेष्यस्य दा
सस्य क्षमितव्यं यस्माद्योद्दासो नापराध्यति तादृशो दासो सम्भाव्यः स्वामिचित्तानुवर्तनस्यातिदुष्करत्वात् ॥
॥ परिचितेन स्वीमीतेन ॥ शौचमिन्द्रियनिग्रहः १४ ॥ उपपन्नं योग्यं युक्तं प्रशस्तं ॥ दोषज्ञो विद्वान् को वा

यदि किंचिदतिक्रान्तं विश्वासात्प्रणयेन वा प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ इति तस्य ब्रु
वाणस्य सुग्रीवस्य महात्मनः अभवल्लक्ष्मणः प्रीतः प्रेम्णा चेदमुवाच ह ॥ सर्वथा हि मम भ्राता सनाथो
वानरेश्वर त्वया नाथेन सुग्रीव प्रश्रितेन विशेषतः ॥ यस्ते प्रभावः सुग्रीव यच्च ते शौचमार्जवं अर्हस्त्वं
कपिराज्यस्य श्रियं भोक्तुमनुत्तमां ॥ सहायेन तु सुग्रीव त्वया रामः प्रतापवान् वधिष्यति रणे श
त्रून्न चिराच्च न संशयः ॥ धर्मज्ञस्य कृतज्ञस्य संग्रामेष्वनिवर्तिनः उपपन्नं च युक्तं च सुग्रीव तव भा
षितं ॥ दोषज्ञः सति सामर्थ्ये कोऽन्यो भाषितुमर्हति वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम सदृ
शश्चासि रामस्य विक्रमेण बलेन च सहायो दैवतैर्दत्तश्चिराय हरिपुंगव ॥ किं तु शीघ्रमितो वीर
निष्क्रम त्वं मया सह सांत्वयस्व वयस्यं च भार्याहरणदुःखितं ॥ यच्च शोकाभिभूतस्य श्रुत्वा रा

सुग्रीवाभ्यामन्यो भवद्वाक्यसदृशं वाक्यं वक्तुमर्हतीति ॥ ॥ वयस्यं नाम ॥ शोकाच्च परुषवाक्या
नामामाकृतत्वशंका मा भूदिति स्वेनैवात्मकृतत्वमुपपादयन्स्वापराधं शमयति यच्चेति रामस्य भाषितं श्रु

९२५

इति श्रीरामायणे किष्किंधाकांडे षट्त्रिंशः सर्गः ३६ १ पंचशैलेषु महेंद्रादिमंदरांतेषु २ पर्वतेषु अस्तमयपर्वतेषु
नित्यः सौवर्णाः षष्टिः सहस्राणि गिरयः संति तेषु तथा पश्चिमस्यां तयैदिशि पश्चिमस्यामित्यर्थः ३ प्रविश्य भवनेश

इत्यार्षे रामायणे किष्किंधाकांडे षट्त्रिंशः सर्गः ३६ एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना हनुमंतं
स्थितं पार्श्वे वचनं चेदमब्रवीत् १ महेंद्रहिमवद्विंध्यकैलासशिखरेषु च मंदरे पांडुशिखरे पंचशैलेषु
ये स्थिताः २ तरुणादित्यवर्णेषु भ्राजमानेषु नित्यशः पर्वतेषु समुद्रांते पश्चिमस्यां तु ये दिशि ३ आदित्य
भवने चैव गिरौ संध्याभ्रसंनिभे पद्माचलवनं भीमाः संश्रिता हरिपुंगवाः ४ अंजनांबुदसंकाशाः
कुंजरप्रतिमौजसः अंजने पर्वते चैव ये वसंति प्लवंगमाः ५ महाशैलगुहावासा वानराः कनकप्रभाः
मेरुपार्श्वगताश्चैव ये च धूम्रगिरिं श्रिताः ६ तरुणादित्यवर्णाश्च पर्वते ये महारुणे पिबंतो मधुमैरेयं
भीमवेगाः प्लवंगमाः ७ वनेषु च सुरम्येषु सुगंधिषु महत्सु च तापसाश्रमरम्येषु वनांतेषु समंततः ८
तांस्तांस्त्वमानय क्षिप्रं पृथिव्यां सर्ववानरान् सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः ९ ॥
रोधे स्थिताः उदयाचलास्तावलयोरित्यर्थः पद्माचलस्तदाख्यपर्वतः ४ तामसाश्रमैः रम्येषु वनांतेषु ८ क
स्पर्वांतैरानयेति संबंधः ९ ॥

९३

रा॰
किं॰
टी॰
५३

प्रथमं पूर्वं ये महाजवा हृताः प्रेषितास्ते मया तातान् अपवृत्त्यावर्तेषां त्वरणार्थं भयसा हरीन्प्रेषय ॥६॥ कामेषु तद्रागेषु ये प्रसक्ता ये च दीर्घसूत्रा विलंबितव्यापाराः योगारूढा एणा इव कालयापका इत्यर्थः आनयस्व आनय ॥७॥ ये हन्ता ॥८॥ प्रवणीय हन्तव्यामादृशा तानीतिपतेन हन्तानन्त्यमुक्तं ॥९॥ तदेव स्पष्टयति छादयन्त इवाम्बरमिति ॥१०॥

प्रेषिताः प्रथमं ये च मया ताता महाजवाः त्वरणार्थं तु भूयस्त्वं हरीन्संप्रेषयापरान् ॥६॥ ये प्रसक्ताश्च कामेषु
दीर्घसूत्राश्च वानराः इहानयस्व तान्सर्वाञ्छीघ्रं तु मम शासनात् ॥७॥ अहोभिर्दशभिर्ये च नागच्छन्ति ममाज्ञया
हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः ॥८॥ शतान्यथ सहस्राणि कोट्यश्च मम शासनात् प्रयान्तु कपिसिं- म३
